संस्कृत बुलेटिन

सायम्  - 06:20

<u>आदौ मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य जूनागढे राष्ट्रिय-वन्यजीव-मण्डलस्य सप्तमोपवेशनस्य अध्यक्षतां कृतवान्। एशियाई-सिंहानां च संरक्षणे आदिवासि-समदायानां महिलानाञ्च भूमिकां प्रशंसितवान्।

· केन्द्रीय-सहकारितामन्त्री अमितशाहः उक्तवान् यत् दुग्धोत्पादक्षेत्रस्य ग्रामीणविकासस्य समृद्धौ महत्वपूर्णं योगदानं अस्तीति।

· महिलासु वित्तीय-जागरूकता विगतवर्षापेक्षया द्विचत्वारिंशत्प्रतिशतं यावत् संवर्धिता इति सूचितं नित्यायोगस्य प्रकाशितप्रतिवेदनेन।

· निर्देशकस्य शॉन बेकर-इत्येतस्य रति-हास्य नाटकः एनोरा इत्याख्यः सर्वश्रेष्ठचलच्चित्रं सर्वश्रेष्ठनिर्देशकं सर्वश्रेष्ठाभिनेत्रीं समेत्य पञ्च ऑस्करपुरस्कारं विजितवान्।

**अपि च,**

· कृष्णा-जयशङ्करः इण्डोर-शॉटपुट- प्रतिस्पर्धायाम् षोडशमीटर-परिमितस्य लक्ष्यम् अतिक्रम्य प्रथमा भारतीया महिला जाता।

<u>प्रधानमन्त्री-गुजरातम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य विश्व-वन्यजीवसंरक्षणदिवसावसरे जूनागढ-जनपदस्य सासनगिर-क्षेत्रे राष्ट्रिय-वन्यजीव-मण्डलस्य सप्तमस्योपवेशनस्य अध्यक्षतां कृतवान्। उपवेशने एतस्मिन् पर्यावरणमन्त्री भूपेन्द्र-यादवः विभिन्नराज्यानां सदस्याः तथा च एतस्मिन् क्षेत्रे कार्यरतानां सर्वकारीयेतर-सङ्घटनानां प्रतिनिधयः विविधराज्यानां सचिवाः सहभागं कृतवन्तः। मण्डलस्य अस्य उपवेशने वन्यजीवसंरक्षण-प्रबन्धनयोः सम्बद्धेषु

प्रकरणेषु चर्चा समनुष्ठिता। ध्यातव्यमस्ति यत् मण्डलमिदं वन्यजीवानां वनानाञ्च संरक्षणं विकासं च वर्धयितुं कार्यं सम्पादयति तथा च अस्य अध्यक्ष: प्रधानमन्त्री वर्तते। एकस्मिन् सामाजिक-सन्देशपटले प्रधानमन्त्री प्रोक्तवान् यत् गिर क्षेत्रस्य अरण्येषु कृतप्रयासै: एशियाई-सिंहानां सङ्ख्यायां निरन्तरं वृद्धि: समङ्किता। अपि च एतेषाम् एशियायी-सिंहानां संरक्षणे आदिवासि-समुदायानां महिलानाञ्च भूमिकां प्रशंसितवान्।

शाह-दुग्धोत्पाद-कार्यशाला

केन्द्रीय-सहकारितामन्त्री अमितशाह: उक्तवान् यत् दुग्धोत्पादक्षेत्रं न केवलं देशस्य विकासे योगदानं ददाति अपि तु ग्रामीणविकासस्य लघुकृषकाणां च समृद्धौ अपि महत्वपूर्णं योगदानं ददाति। नवदिल्ल्यां दुग्धोत्पाद क्षेत्रे सुस्थिरता-सम्भाव्यक्षेत्रयो: कार्यशालाया: उद्घाटनं कुर्वन् श्रीशाह: कथितवान् यत् दुग्धोत्पादक्षेत्रं देशस्य पोषणस्य अपि परिपालनं करोति।

सहकारितामन्त्री अवदत् यत् श्वेत-क्रांति-द्वितीय इत्येतस्मै दुग्धोत्पदक्षेत्रे सुस्थिरता महत्वपूर्णा वर्तते। श्रीशाहेन देशस्य अशीतिप्रतिशत-जनपदेषु दुग्धोत्पादसङ्घस्य निर्माणाय बलं प्रदत्तम्।

कार्यशालायां पर्यावरणेन सह आर्थिकविकासं सुनिश्चेतुं दुग्धोत्पादक्षेत्रं संवर्धनोद्देश्येन च सहकारितामन्त्रालयस्य पशुपालन-दुग्धोत्पाद-मत्स्यपालन-मन्त्रालयस्य च नीतिषु उपक्रमेषु च ध्यानं प्रदास्यते। अस्मिन् अवसरे केन्द्रीयमत्स्यपालन-पशुपालन-दुग्धोत्पाद-मन्त्री श्री राजीव-रञ्जन-सिंह: उक्तवान् यत् विगतदशवर्षेषु-देशे दुग्धोत्पादने त्रिषष्टि- प्रतिशताधिकं वृद्धि: जाता। कार्यशालावधौ नैकेषु राज्येषु जैविकेन्धन-संयंत्रस्य स्थापनाय सहमतिपत्राणि हस्ताक्षरितानि।

नीत्यायोग:

महिलासु वित्तीय-जागरूकता विगतवर्षापेक्षया द्विचत्वारिंशत्प्रतिशतं यावत् संवर्धिता। वार्तेयम् अद्य नीत्यायोगद्वारा नवदिल्ल्यां प्रसारिते एकस्मिन् विवरणे प्रकाशितम्। प्रतिवेदनानुसारि भूयोऽपि सप्ततिलक्षाधिक-द्विकोटिसङ्ख्यका: महिला: विगतवर्षे दिसम्बरमासे स्वव्ययस्य निरीक्षणं कुर्वत्य: आसन्।

## राजनाथ: -रक्षा

रक्षामन्त्री राजनाथसिंह: पुनरावर्तितवान् यत् भारतम् आगामिनो: द्वयो: वर्षयो: विश्वस्य तृतीया बृहत्तमार्थव्यवस्था भवेदिति। असौ कथितवान् यत् साम्प्रतं भारतम् विश्वस्य पञ्चमी बृहत्तमार्थव्यवस्था जाता। असौ अद्य नवदिल्ल्यां सशस्त्र-सैन्यध्वज-दिवसम् आलक्ष्य सम्बोधितवान् यत् देशस्य आर्थिकविकासे सार्वजनिक-सार्वजनिकेतर-क्षेत्रयो: महत्तवपूर्णभूमिका दृश्यते।

रक्षामन्त्रिणा प्रोदीरितं यत् भारतस्य प्रतिजनम् आय: नैरन्तर्येण वर्धमानो भवतीति यो हि देशस्य समग्रर्थिक-वृत्रिं प्रदर्शयति। अमुना भारतीयसैनिकानाम् अप्रतिमसमर्पणस्य प्रशंसा कृता अपि च देशस्य सीमासुरक्षायां रक्षाया: प्रथमा पंक्ति: इत्येतस्य रूपेण तेषां भूमिका च श्लाघिता।

## सर्वोच्चन्यायालयः-दृष्टिबाधिताः

एकस्मिन् महत्त्वपूर्ण निर्णये सर्वोच्चन्यायालयेन अद्य कथितं यत् दृष्टिबाधित-दिव्याङ्ग-जनाः न्यायिक-सेवासु वृत्यवसरैः वञ्चिताः नैव भवितुं शक्नुवन्ति। अद्य निर्णयम् अमुं श्रावयन् न्यायमूर्तिः आर्० महादेवन्-इत्येषः अकथयत् यत् दिव्याङ्गजनानां न्यायिकसेवानां नियुक्तिषु कोऽपि भेदभावः न भवेदिति अपि च सर्वसमावेशक-संरचनां सुनिश्चितुं राज्यैः तेभ्यः सकारात्मक-कार्यम् अवश्यं प्रदातव्यम्। न्यायमूर्तिन्योः जेबीपारदीवाला-आर्० महादेवन-इत्यनयोः एकेन पीठेन विगत-वर्षे दिसम्बरमासे केषुचित् राज्येषु न्यायिक-सेवासु एतादृशानाम् अभ्यर्थिनां कृते आरक्षणं नैव प्रदीयमाने प्रकरणे स्वतः एव संज्ञानं समेत्य षड् याचिकासु निर्णयः सुरक्षितः कृतः आसीत्। सर्वोच्चन्यायालयेन मध्यप्रदेश-न्यायिकसेवानियमस्य चतुर्नवत्यधिक-नवदश-शततमस्य एकं प्रावधानं निरस्तीकृतम् यद्धि राज्ये न्यायिक सेवायाः दृष्टिबाधिताः अल्पदृष्टियुताः अभ्यर्थिनः अवरोधयति अपि च मौलिक-समानतायाः सुनिश्चितस्य महत्वमपि रेखाङ्कयति।

## जम्मू-कश्मीरराज्ये हिमपातः

जम्मूकश्मीरराज्ये कश्मीरोपत्यकायाः अधिकांशेषु निम्नवर्ति-क्षेत्रेषु पर्वतीयक्षेत्रेषु च प्रातः कालादेव वृष्टिः हिमपातः च जायेते। श्रीनगरे अपि प्रातः कालादेव अल्पवृष्टिः जायते। उत्तर-कश्मीरस्य कुपवाड़ा-बान्दीपोरा-जनपदयोः अधिकेषु क्षेत्रेषु हिमपातः जातः। क्षेत्रे प्रचण्डहिमपातेन गुरेज-बान्दीपोरा-मार्गः वाहनावागमनाय निरूद्धः कृतः। दक्षिणकश्मीरस्य शोपियां-जनपदे निम्नवर्ति क्षेत्रेषु वृष्टेः पर्वतीय क्षेत्रेषु हिमपातस्य च अनन्तरं-तापमाने अपिचितिः जाता।

## ऑस्करपुरस्काराः

लॉस-एंजिलिस इत्यत्र अकादमी-पुरस्करस्य सप्तनवतितं संस्करणम् अद्य सुसम्पन्नम्। निर्देशकस्य शॉन बेकर-इत्येतस्य रति-हास्य नाटकः एनोरा इत्याख्यः सर्वश्रेष्ठ चलच्चित्रं

सर्वश्रेष्ठ निर्देशकं सर्वश्रेष्ठपटकथां सर्वश्रेष्ठसम्पादनं सर्वश्रेष्ठाभिनेत्रीं समेत्य पञ्च ऑस्करपुरस्कारं विजितवान्।

## शॉट-पुट

भारतस्य कृष्णा-जयशङ्कर इत्येषा न्यूमैक्सिको-नगरे अस्य वर्षस्य माउण्टेन-वेस्ट-इण्डोर-ट्रैक-एण्ड-फील्ड-चैम्पियनशिप इत्येतस्यां प्रतिस्पर्धायाम् इण्डोर-शॉटपुट-क्रीडायां षोडशमीटर-परिमितस्य लक्ष्यम् अतिक्रम्य प्रथमा भारतीया महिला जाता। एषा शून्य त्रीणि दशांशोत्तर षोडश मीटरमितं यावत् प्रक्षेपणं कृत्वा इतिहासं रचितवती। एषा स्वीया अन्तिमप्रक्षपणेन कांस्यपदकं विजितवती।